॥ अनन्तनामधेयायैश्री सीतायै नमो नमः ॥

# ॥ सकारादि श्रीसीतासहस्रनाम-स्तोत्रम् ॥

## [ श्रीरुद्रयामल--तन्त्रोक्तम् ]

सुरालये प्रधाने तु देवदेवं महेश्वरम् । शैलाधिपस्यतनया सप्रेम हरमुवाच ह ॥१॥

श्री देव्युवाच

परमेश परंधाम-प्रधानपुरुषेश्वर । नाम्नां सहस्रं सीतायाः विस्तरात् वद शङ्कर ! ॥२॥

श्री महादेव उवाचः—

शृणु देवि प्रवक्ष्यामि नाममध्येसहस्रकम् । परंधामप्रदाविद्या चतुर्वर्गफलप्रदा ॥३॥
गुह्यात्गुह्यतमां देवि ! सर्वसिद्धयैकवन्दिता । अतिगुह्यतराविद्या सर्वतन्त्रेषु वेदिता ॥४॥
विशेषतः कलियुगे महासिद्धयौघदायिनी । गोपनीया प्रयत्नेन कस्मैचिन्नप्रकाशयेत् ॥५॥
विनाध्यानं-विनापूजा-विनाहोमं-विनाजपम् । विनापुष्पं–विनागन्धं विनादानं विनामखम् ॥६॥
सकृदुच्चरिताविद्या ब्रह्महत्यां व्यापोहति । एतद्विज्ञानमात्रेण सर्वसिद्धीश्वरोभवेत् ॥७॥
अप्रकाश्यमिदं सत्यं स्वयोनिरिव सुव्रते । रोधिनीविघ्नसंघानां मोहिनीपरयोषिताम् ॥८॥
स्तम्भिनी राजसैन्यानां वादिनी परवादिनाम् । कलौ पापसमाकीर्णे पठनान्मुक्तकिल्विषा ॥९॥
तस्मात्वं पठ देवेशि ! स्वर्गमोक्षप्रदायकम् । न्यासविद्यां प्रवक्ष्यामि शृणु पर्वतनन्दिनी ॥१०॥

देव लोक में सर्व श्रेष्ठ कैलाश में देव देव महादेव शङ्करजी से श्री पार्वती जी ने प्रेम पूर्वक पूछा--हे प्रधान पुरुषों में सर्वोत्तम प्रभो ! आज तो आप श्री सीता जी के सहस्रनाम विस्तार पूर्वक सुनाने की कृपा करें । श्री महादेव जी ने कहा:—

हे देवि ! श्री जानकी जी के अनन्तानन्त नामों में से केवल एक हजार नाम मैं आज सुनाता हूँ । यह अर्थ-धर्म-काम-मोक्ष देने वाली परा विद्या है, यह प्रभु का परम धाम भी प्रदान करती हैं । गुप्त से भी महागुप्त सर्व सिद्धियों से वन्दनीय अत्यन्त गोपनीय तन्त्रों द्वारा ज्ञात होने वाली महा विद्या है । विशेष कर कलिकाल में सम्पूर्ण महा सिद्धियों को प्रदान करने वाली है । अतः जिस किसी को नहीं कहनी चाहिये । गुप्त ही रखनी चाहिये । विना ध्यान के-विना पूजा के-विना होम के-विना जप के-विना पुष्प चन्दन के तथा विना यज्ञ के दान दक्षिणा के केवल एक बार श्रद्धा विश्वास से पाठ करने मात्र से ही ब्रह्म हत्यादिक महान् पापों से छुटकारा दे देती है । इसके जानने से ही मनुष्य सर्व सिद्धियों का सम्राट् बन जाता है । अतः अपने गुप्त अङ्ग की भांति हे सुन्दर मुख वाली पार्वती ! इसको छिपा कर ही रखना

चाहिये। यह सभी विघ्नों को रोकने वाली है, स्त्रियों को मोहित करने वाली है, राजा की सेनाओं का स्तंभन करने वाली है तथा विवाद में प्रतिवादी को परास्त करने वाली है। पापों से भरे हुए कलियुग में पाठ करने मात्र से पावन करने वाली है। अतएव हे देवि ! स्वर्ग तथा मोक्ष फल प्रदायक इस श्री सीतासहस्रनाम का पाठ तुम अवश्य करो। हे पार्वति ! इसकी न्यास विधि का मैं वर्णन करता हूँ सो तुम सुनों ( श्लोक १ से १० )

अस्यसहस्रनामस्य ऋषिर्ब्रह्मा प्रकीर्तितः । छन्दोऽनुष्टुप् प्रोक्तश्च सीतादेवी प्रकीर्तिता ॥११॥
सौरभं बीजमाख्यातं कमलाशक्तिरीरिता । कीलकं पाशबीजेन विनियोगस्ततः परम् ॥१२॥
अथध्यानं प्रवक्ष्यामि सीतायाः परमाद्भुतम् । सर्वपापहरं दिव्यं सर्वकामफलप्रदम् ॥१३॥
आयुः कीर्तिकरंपुण्यं सर्वाघौघ विनाशनम् । ज्ञात्वा सम्यक् विधानेन न्यासजालंसमाचरेत्॥१४॥

ॐ अस्य श्रीसीतासहस्रनाममन्त्रस्य ब्रह्माऋषिः अनुष्टुप् छन्दः श्रीसीतादेवतायैनमः ! ह्रीं ह्रीं क्ली बीजाय नमः श्रींशक्तये नमः आं कीलकाय नमः ममसकलाभीष्टसिद्ध्यर्थे जपे विनियोगः । अथध्यानम्—

इस श्री सीतासहस्रनाम के ब्रह्मा ऋषि है, अनुष्टुप् छन्द है। श्री सीता देवता है, ह्रीं-ह्रीं-क्लीं बीज है, कमला शक्ति है, आं कीलक है अभीष्ट मनोरथ की पूर्ति तथा श्रीसीताजी की कृपा प्राप्ति इसका विनियोग है। इसी से ऋष्यादि न्यास करके "श्रीसीतायै स्वाहा" इस मूल मन्त्र से अङ्गन्यास-करन्यासादिक करना चाहिये। अब हम श्रीसीताजी का परम अद्भुत सर्व पाप नाशक-आयु-कीर्ति तथा पुण्य प्रर्धक-सर्व विघ्न विनाशक-भक्त की सभी कामनायें पूर्ण करने वाला ध्यान वर्णन करते हैं ( श्लोक ११ से १४ )

ध्यायेज्जानकीं रम्यां मुक्ताहारसुशोभिताम् । अनन्तरत्नरचितां सिंहासन विराजिताम् ॥१५॥
उद्यत्सूर्यसहस्राभां दाडिमीकुसुमप्रभाम् । सुवृत्तनिविडोत्तुङ्ग कुचमण्डलराजिताम् ॥१६॥
अनर्घ्यं मौक्तिकस्फार हारभारविराजिताम् । नवरत्नप्रभाराजि ग्रैवेयवर भूषणाम् ॥१७॥
श्रुतिभूषामनोरम्यां सुगण्डस्थल भूषणान् । नमामि परमां देवीं रामवामाङ्कगां शिवाम् ॥१८॥

मुक्ताहार से सुशोभित, अनन्त रत्नों से जड़े हुए सिंहासन पर विराजमान-उदय होने वाले हजारों सूर्यों के समान प्रकाशित-अनार के फूल के समान अरुण प्रभा वाली-सुन्दर वक्ष स्थल से सुशोभित-बहुमूल्य मणि मुक्ताओं के हार धारण किये हुए-नव रत्नों की प्रभा से चमकता हुआ कण्ठ भूषण गले में पहने हुए-मनोहर कर्णफूल कान में शोभता है ऐसी परम कल्याण स्वरूपा श्रीराम के वाम भाग में विराजमान श्री जानकी जी का ध्यान करके मैं प्रणाम करता हूँ। इस प्रकार का ध्यान कर हृदय में ही मानसिक पूजा के उपचारों से उनके श्री चरणों का पूजन करके भक्तजन इस स्तोत्र का पाठ करे। तत्पश्चात् श्लोक १८३ तक सम्पूर्ण पाठ करके तब फलश्रुति पढ़े ( श्लोक १५ से १८ )

इति ध्यात्वा ह्युपचारैस्सम्पूज्य स्तोत्रकं पठेत् । ॐसीता सीमन्तिनी सीमा सन्मन्त्रफल दायिनी
सत्या सत्यवती सामा सात्त्विकी सर्वमङ्गला । सत्प्रभावा सतीसाध्वी सत्कला सत्कलेष्टदा
समस्ता समदा सान्द्रा सान्द्रनीलसमप्रभा । सौभाग्यजननी सेव्या सौम्या सुन्दररूपिणी
संभ्रमा संभ्रमातीता सन्तुष्टफलदायिनी । सर्वोत्तुङ्गकला सर्वा सर्वेष्टा सङ्गमप्रिया
शान्तिप्रिया शान्तिमती सीमन्तमणिभूषणा । सावित्री सन्मुखी सिद्धा शारदा च समप्रभा
स्वतन्त्रा सत्यसङ्कल्पा समदृष्टिफलप्रदा । सारङ्गसदृशा श्यामा सरसा शशिशेखरा
समाना सामगा शुद्धा समस्तसुर सम्मुखी । सर्वसम्पत्प्रदात्री च शमदा सिन्धुसेविनी
सरसीरुह मध्यस्था सरोवर विहारिणी । सरस्वती सुवर्णश्री श्रीजया शुभदायिनी
सर्वमाङ्गल्यजननी सार्वभौम प्रदायिनी । साम्राज्यकारिणी साम्रा साम्राज्यफलदायिनी
सत्यव्रता सत्यपरा सद्भावा सत्परायणा । सन्मार्गकर्त्री सम्मान्या सम्मानसुखदायिनी
सत्यज्ञानप्रदात्री च सुमनाराध्यपादुका । स्वर्णकान्ति समप्रख्या स्वर्णाभरण भूषिता
सत्सङ्कल्पप्रदा सज्या सुखी सौख्यवरप्रदा । संसारसागरारूढ संसारभय नाशिनी
सर्वार्थसाधिनी सर्वा शर्वाणी शङ्कर प्रिया । शाश्वतस्थानफलदा शासना शासनप्रिया
समता समतासारा सारस्वत फलप्रदा । सिंजानमणिमञ्जीरा सस्मिताऽधरपल्लवा ॥
सर्वसौन्दर्यनिलया सर्वसौभाग्यशालिनी । सज्जनानन्द निलया सत्कर्म फलदायिनी ॥
सूक्ष्मा सूक्ष्मगतिस्स्तुत्या सूक्ष्मज्ञानप्रदायिनी । सौदामिनी सुधादेवी सिन्धुरूपा च साम्बिका ॥
सिद्धिप्रदा सिद्धिवन्धु सिद्धेशी सिद्धसुन्दरी । सन्ध्येयत्री सन्ध्यजरा सन्ध्या तारुण्यलालिता ॥
शमदा शाङ्करी सेतु सुकोला सरसीरुहा । सोमेश्वरी सोमकला सोमपान सुसम्मता ॥
सौम्यानना सौम्यरूपा सोमस्था सोमसुन्दरी । सूर्यप्रभा सूर्यमुखी सूर्यजा सूर्यसुन्दरी ॥
सूर्यकोटि प्रतीकाशा सूर्यतेजोमयी सती । सोमकोटि प्रभा शोभा सोममण्डलवासिनी ॥
शतानन्दा श्रुतिधरा सुषुम्ना शोभनप्रिया । शोभावती सुशोभाढ्या शोभना सुभगा सुखा ॥
शताक्षी शम्बरध्वंसी सहस्राक्षी सहोदरी । सहस्रशीर्षा सर्वेशी सहस्रपदसंयुता ॥
सहस्राक्षी सुवस्त्राढ्या सहस्रभुजवर्तिका । शुभवस्त्रप्रिया सुन्दा शत्रुघ्नीशंतनुप्रिया ॥
शतानना च शवरी सहस्रपदपङ्कजा । शिशुपाश्वत्तनिलया शम्बरारि सुखप्रदा ॥
श्रान्तिहा सन्ततिः सत्या सन्तानफलदायिनी । श्रींकाररूपिणी श्रद्धा श्रेयदा श्रमनाशिनी ॥
श्रेष्ठा श्रेष्ठकरी श्रेया श्रुतिरूपा श्रुतिप्रिया । श्रेणीपति समाराध्या सुष्ठुगान प्रियङ्करी ॥

स्थाणुपत्नि स्थितिकरा स्थितिस्था स्थितिवर्द्धिनी । श्रद्धावती च श्रमदा श्रद्धा भक्तिसमन्विता ॥
श्रीविद्या षोडशी षोढा षोढान्यासफलप्रदा । शुक्लाम्बरपरीधाना शुक्लगन्धानुलेपना ॥
शुक्लपुष्पप्रिया शुक्ला शुक्लाभरणभूषिता । स्वयंज्योतिः स्वयंकर्त्री स्वयमानन्दविग्रहा ॥
शेषादिशायिनी शेषा श्रीधरार्चितपादुका । संकर्षणप्रिया सभ्या सभामण्डलवासिनी ॥
सर्वेन्द्रिया-सर्वगतिः-सर्वसाक्षी-समुन्नता । संग्रामकारिणी-शैवा-सरयूतीरवासिनी ॥
सद्ब्राह्मण कुलोत्पन्ना-सच्चिदानन्दरूपिणी । सुगमा-सुगमप्रीता-सुगमध्यानतत्परा ॥
सोमपानरता-सोमा-शाम्भवी-शम्भुवल्लभा । समया-समयाचारा-संविज्ञानपरायणा ॥
सनातनप्रिया-शूरा-शूरश्रेणीविराजिता । श्रुतिस्मृतिप्रदात्रीच-श्रवणी-श्रावणप्रिया ॥
शतपत्रप्रिया-स्तोरा-सामन्तकुसुमार्चिता । सुबोधा-सुमतिः स्वेच्छा-सुरेशवरदायिनी ॥
सङ्गीतगानरसिका - सदास्वरविराजिता । सरिगमज्ञानफलदा - सदासन्तोषकारिणी ॥
सामवेदकृतोत्सङ्गा-सामगानप्रियङ्करी । श्रीगौष्णवसमाराध्या - स्वेच्छाविभवदायिनी ॥
स्वच्छन्दाचारनिलया-स्वेष्टा-स्वेष्टफलप्रदा । स्वच्छन्दा-सानुरूपस्था-साम्याधिकवरप्रदा ॥
शाकम्भरी-शिवाराध्या-सिंहाचलनिवासिनी । शिवङ्करी-शिवाङ्कस्था-शिवध्यानपरायणा ॥
सम्पादनप्रिया सम्पा-सम्पूर्णफलदायिनी । शंखरत्राशिनी शङ्खस्वना-शङ्खगलाशशी ॥
शङ्खिनी-शङ्खवलया-शङ्खमालावती-समी । शम्बरी शाम्बरी-शम्बू-शम्बुकी-शबराशिनी ॥
शङ्खी-शङ्खवती-शङ्खा-श्यामाङ्गी-श्यामलोचना । श्मशानस्था-श्मशाना च श्मसानस्थल भूषणा ॥
शिवदाऽशिवहन्त्री च शकुनी-शङ्कुशेखरा । सुमुखी-शोषिणी-शोषी-सौरी सौर्ध्या सरासरी ॥
शंपहा-शापहा-शम्पा सम्पत्-सम्पत्तिदायिनी । शृंगिणी-शृङ्गीफलभुक् शान्तिनी-शङ्करप्रिया ॥
शंका-शंकापहासंस्था-शाश्वता शीतला-शिवा । शिवस्था-शिवभुक् शाली-शिवाकरा शिवोदरी ॥
शायिनी-शयनी-शिसा-शिशुपः-शिशुपायिनी । शवकुण्डलिनी-श्वेता-शीकरी-शशिलोचना ॥
शिवकाञ्ची-शिवश्रीका-शिवमाला-शिवाकृति । सम्पातिः शंकुवसतिः शन्तनुः शीलदायिनी ॥
सिन्धुः स्वैरगतिः सैंध्री सुन्दरी सुन्दरानना । साधुः सिद्धा सिद्धिदात्री सिद्धासिद्धस्वरूपिणी ॥
सरः समा समाना च समाराध्या समस्तदा । समृद्धा समदा सहना सम्मोहा रूपदर्शना ॥
सन्मितिः समिधा स्नेहा सुधारस समन्विता । समीरा संतता सप्ता साध्वी साधुसहायिनी ॥
शाद्वली संकृतिः शाढ्या सम्प्रदायप्रसाविनी । सुवना सुमनाचारा समाना सामसी शुभा ॥
श्रीमता श्रीमती श्रीमा श्रीशा श्रीवृषवासिनी । सालंकृता शालुवेशी शालुवेश प्रियङ्करी ॥

सुलभा सुलभाराध्या सुधावा सुष्ठुमल्लिका ।
शुचिज्ञा सुमना शुद्धा शुचिध्यान समाश्रिता ॥७१॥

शुचिकर्मपरा शुभ्री शुचिनी सूचनप्रिया ।
सुज्ञाननिलया सुज्ञा सुबुद्धि सन्निवेशना ॥७२॥

सत्कालगामिनी स्पर्शा शिवमौलिकृताश्रया ।
स्तुत्यर्था सर्वबोधनी सम्पवत्फलदायिनी ॥७३॥

संसर्गा संस्पृशा स्तुत्या स्तोकस्तोत्र प्रियङ्करी ।
सदया सर्वदास्तुत्या सुधिया सर्वा देवता ॥७४॥

सुरालया सुन्दरता सुवर्णा सुमनार्चिता ।
सद्बोधनिरता सत्या सव्यपाणिः सुरद्युतिः ॥७५॥

सांख्यायनमुनिस्तुत्या सांख्यासाहित्यदायिनी ।
शाल्मली कुसुमप्रख्या शौंडीमेमार्जनीकर ॥७६॥

स्कन्दपुत्री स्कन्दमाता स्कन्दा स्कन्दवरप्रदा ।
स्फुटार्थफलदा स्फोटा स्फुटवक्त्रा स्फुटप्रिया ॥७७॥

संसारपंकनिर्मग्नसमुद्धरणपण्डिता ।
सानिध्यदायिनी सन्धिः सुवशा सुमनोहरा ॥७८॥

सम्यक्समुच्चरी सत्या स्वर्भानुःफलदायिनी ।
शसका संस्मिता सस्मा सुमेरू शुचिभूषणा ॥७९॥

शुचिस्मिता सुनेत्रा च सुकोमला सुलक्षणा ।
शुण्डप्रिया शुण्डमाता शुण्डादण्ड विराजित ॥८०॥

सञ्चिता सञ्चरी सैवा सत्या भूपालसेविता ।
सुमेखला सुगुप्ता च सुगिरा च विस्तरा ॥८१॥

सकुन्तला च सद्गुण्या शठपापविहारिणी ।
स्मरपत्नीसमाराध्या स्मरारि गुणदायिनी ॥८२॥

सम्पूज्यदेवताख्या सनकादिमुनिस्तुता ।
स्वभावचञ्चलापाङ्गी सनन्दनवरप्रदा ॥८३॥

साष्टाङ्ग नमनप्रीता सम्मीलन परायणा । शान्तोदरी स्वयंधामा शरणागतवत्सला ॥
शोभावती शुभाकारा शङ्करदीर्घशारिणी । श्रोणा शुभ्रजला शुभ्र् शरसन्धानकारिणी ॥
शरावती शरानन्दा शरज्ज्योत्स्ना शुभानना । शलभा शूलिनी श्रोता सुनम्रा शुक्लवाहना ॥
शुभ्र् वारिप्रिया षड्ऋतुश्च षडानना । षडाधारस्थिता शस्ना षडंजा षणमुखप्रिया ॥
सन्यासधारिणी सैन्या सुधन्या सुष्ठुगोचरा । षडङ्गरूपसुरता सुरासुर नमस्कृता ॥
सर्ववासा सदोन्मत्ता सुस्तनी सागराम्बरा । सुव्यवस्था च सुरभिः सूर्यमण्डलमध्यगा ॥
सत्यार्थनिलया सत्या सत्यजिह्वाग्रवासिनी । सहस्रद्वयजिह्वाग्र शेषपर्य्यङ्कशायिनी ॥
सत्यार्चिमण्डलगता सव्या सूर्यविभूषणा । सारिका श्यामला स्मेरा स्मेरवक्त्रा शुकप्रिया ॥
शुकाध्ययन सम्पन्ना शुकी शुकवरप्रिया । शुक्राचार्य :प्रियाऽशोका शोकसन्तापहारिणी ॥
स्वर्गमोक्षसुखद्वारा सर्वकामसुखप्रदा । सप्तद्वीपात्मकाधारा सप्तसागरधारिणी ॥
सर्वपर्वाच पर्वाग्रा सप्तर्चि सुरसेविता । सद्योजीवा सर्वसन्ध्या सर्वलोकसमाश्रया ॥
सुधावक्त्रा सौमनस्या सम्भूता सुकृतालया । सर्वा सर्वजगत्पूज्या सर्वद्वन्दविनाशिनी ॥
संसारपाशविछिन्ना सर्वमन्त्रमयी सुरा । सुधासम्मृष्टसर्वाङ्गी सुधापङ्कजमालिनी ॥
सूर्याङ्गुली सुनक्षत्रा सौरी केशोस्वलङ्कृता । सर्वदेवसमुत्पन्ना सर्वदेवमयीश्वरी ॥
सूर्यजालांशुमध्यस्था संक्रमा संक्रमप्रिया । सर्वपौरुषवल्ली च सर्वधर्माधिकारिणी ॥
सप्तकोटीश्वरी विद्या संसारार्णवतारिणी । श्रीकण्ठा शितिकण्ठा च सुधाधाराम्बुवर्षिणी ॥
समुत्तीर्णा शक्तिरूपा सुशक्तिश्च सुधावती । सकलाख्यानसन्तुष्टा सोमसूर्याग्निमध्यगा ॥
सूक्ष्मसूत्रा सूक्ष्मरूपा सुसूत्रा सूत्ररूपिणी । सहस्रादित्यसंकाशा सहस्रनयनोज्वला ॥
सहस्रमूला सहस्रेशी सर्वविघ्नविनाशिनी । सर्ववादित्र हस्ता च सर्वप्रहरणोद्यता ॥
सुरभी सौरमेयी च सुधाधारा सुधावहा । सर्वबन्धन संछेत्री सर्वाभिचारनाशिनी ॥
सर्वसिद्धि महापाया सर्वस्वार्थकसाधिका । सर्वसंग्रामजननी सर्वशत्रुविनाशिनी ॥
सर्वैश्वर्यसमुत्पत्तिः सर्वलोकैकदीपिका । सर्वलोक सुखोत्पन्ना सर्वतः सुखदायिनी ॥
सर्वदुःखान्तकरणी सुभद्रा सर्वसात्विका । सहस्रशाखाफलिनी सर्वरोगनिषूदिनी ॥
शत्रुद्वेष्ट्री शत्रुहन्त्री शत्रुनामनिकन्दिनी । सकलंहा स्वरूपस्था सोऽहं शब्दस्वरूपिणी ॥
श्रीमन्त्रराजसदृशा श्रीशैलपदगामिनी । श्रीचक्रराजनिलया श्रीमत्त्रिपुर सुन्दरी ॥
सुवासिन्यर्चनप्रीता सुकुमार प्रियङ्करी । सदोन्मत्ता सदातुष्टा शर्मदा शम्भुमोहिनी ॥

स्वस्था स्वभावमधुरा सदाशिवकुटुम्बिनी ।
सव्यापसव्यमार्गस्था सव्यसात्री सहायिनी ॥ ११० ॥

सुदक्षिणा सुकौमारी सुमेना च सुरम्भिका ।
सर्वोपनिषद् स्तुत्या समीरतनयस्तुता ॥ १११ ॥

सत्यज्ञानानन्दरूपासामरस्य परायणा ।
सर्वोपाधि विनिर्मुक्ता सदाशिव पतिव्रता ॥ ११२ ॥

सर्वतन्त्रेश्वरी शक्ति सर्वगा सर्वमोहिनी ।
सर्वाधारा सुप्रतिष्ठा सदसद्रूपधारिणी ॥ ११३ ॥

सर्ववेदान्त संवेद्या सत्यानन्द स्वरूपिणी ।
शुभाचारा समावाणी सवीदक्षिणा विराजिता ॥ ११४ ॥

सर्वादने प्रीतचित्ता सिन्दूर तिलकाङ्किता ।
सहस्रदलमध्यस्था सर्ववर्णोपशोभिता ॥ ११५ ॥

सर्वायुधधरा शुक्रा संस्थिता सर्वतोमुखी ।
स्वाहा स्वधा सहस्रारा सर्वमृत्युनिवारिणी ॥ ११६ ॥

सश्लाघायुधसम्पन्ना स्वाधिष्टाम्बुज संस्थिता ।
समस्त भक्तसुखदा शाकिन्येवास्वरूपिणी ॥ ११७ ॥

शिवदूती शिवाराध्या शिष्टेष्टा शिष्टपूजिता ।
संहृताशेषपाखण्डा सदाचार प्रवर्तिनी ॥ ११८ ॥

स्वात्मानन्दलयीसूक्ष्मा शुभाह्लादनचन्द्रिका ।
सद्यःप्रसादिनी साक्षी साक्षिणी साक्षिवर्जिता ॥ ११९ ॥

षडङ्गदेवतायुक्ता षाड्गुण्यपरिपूजिता ।
श्रुतिसीमन्तसिन्दूरी सदाशिवगृहस्थिता ॥ १२० ॥

सकलागम सन्दोहा शुक्तिसम्पुट मौक्तिका ।
सहस्रवदनप्रीता सर्वश्रम निवारिणी ॥ १२१ ॥

सत्यप्राज्ञापिका सत्या सार्वावस्थाविवर्जिता ।
संहारिणी सृष्टिरूपा सृष्टिकर्त्री शिवालया ॥ १२२ ॥

'सहर्ह्रीं' बीजरूपात्मा 'सौं' बीजनिलयात्मिका । 'सहौं' बीजसुसर्वाङ्गी सम्मोहन ऋषिप्रिया ॥
सकलं 'ह्रीं' महाविद्या शुक्राचार्य हृदिस्थिता । सान्तमौलैकबीजस्था सच्चिद्रसमुपाश्रिता ॥
सदसद्रामनिलया शतरुद्रा शतानना । श्रीरामहृदयानन्द दशाननविघातिनी ॥
स्ह्रौंबीजा श्रींबीजा श्रीं श्रीं श्रीं श्रौं श्रीनिकेतना । स्वरन्यास स्वरूपस्था शुक्रान्ता शुक्रतर्पणा ॥
सुकर्पूरनिभासात्मा शुभस्थल निवासिनी । संध्याप्ररूपिणी संध्या संहिता संहितात्मना ॥
सूनासमेदोस्थिगता सुकुत्ता सुहृदिस्थिता । फिंसुलो च भासौफासक्रौं समदलात्मिका ॥
सक्रीं हंस स्वरूपस्था स क्लौं विहगरूपिणी । सुवर्णा वर्णा सर्वाङ्गी श्रीरूपा शास्त्रशालिनी ॥
सक्रमान्यासवेणी च स्वामिनी शिवपोषिणी । श्वेतातपत्रधरिणी सिद्धार्थी शीलभूषणा ॥
सत्यार्थिनी सन्ध्याभा च शची सिद्धी संहंकरी । संकोचार्थ प्रदर्शी च सुहृदबन्धुविहारिणी ॥
शिपिविष्ट प्रियाश्लोका सुकामा सज्जनाश्रया । सूक्ष्मेमलवरघुरूपा स्थारलौरूपधारिणी ॥
शिवशक्तिसमाश्लिष्टा स्फुरद्व्योमान्तरस्थिता । सर्वरोगहराख्या च सौरभा चौर संस्तुता ॥
सम्पुटब्रह्मरूध्यस्था सर्वसम्पुट मालिका । सर्वाशापूरणीश्लाघ्या श्लींबीजा श्लींपराशिला ॥
शिलास्वरूपतरणी शुक्लाङ्गी शुक्लभाषिणी । सदा श्रृङ्गनिवासी च सावर्णीतनयस्तुता ॥
सुरथा सुरथारूढा सुरथ ज्ञानदायिनी । स्त्रौंबीजवासिनी श्रांता श्रान्तसन्तापहारिणी ॥
श्मशानकाली सा गुह्या श्मशानागार भूषणा । शाक्तप्रिया शक्तिकला शाक्ता शक्तिपरायणा ॥
सखिवृन्दनिवासा च सखिगोष्ठी प्रियंकरी । शुभभोगाद्यसन्तुष्टा सर्वज्ञानाक्षमालिनी ॥
श्वेतद्वीपनिवासा च शुभ्रजाम्बूनदस्थिता । समाश्लेषातुरात्मा च सविद्युत्तं जरूपिणी ॥
साकारनिलया साका साकेतपुरवासिनी । सप्तव्याहृतिसंयुक्ता स्नुषा सुध्यक्तमालिका ॥
साम्बालया साम्बरूपा सुनागमणिभूषणा । सुजटा सौकला सौख्या सर्पमालविभूषणा ॥
संहार भैरवस्तुत्या स्मार्तहोमप्रियंकरी । सर्पिप्रिया समृद्धा सा सद्वैद्यभिषजप्रिया ॥
सौराष्ट्रदेशमध्यस्था सोमनाथेश्वराङ्गना । स्वयंवरोत्सवप्रीता सौमित्रिप्रियभाषिणी ॥
शक्तिसङ्गमसन्तुष्टा शरत्ताराङ्गणास्थिता । सप्ताश्वरथसंस्था च श्वेतकुञ्जरवाहिनी ॥
श्रीमद्भवती श्वासा सुकुमारी सुकन्यका । श्रीसागानन्ददमना श्रीमज्जनकनन्दिनी ॥
सवार्द्रतस्वरूपा च सुकर्णा च सुकुण्डला । संभावकारिणी श्वासा चातुरी शान्तरोहिणी ॥
सैरावती सरोन्मादा सरावणा निकन्दिनी । सहस्राननघाती च सपट्टिशकरायुधा ॥
सक्रौं कालि स्वरूपस्था सल्हौं भेदस्वरूपिणी । सग्लौं पञ्चास्त्ररूपस्था साध्वं पञ्चस्वरूपिणी॥

त्वं पञ्चमुद्राधिगता सच्छीघ्रश्च मधुव्रता । सनातन प्रेतसंस्था स पञ्चामृत भक्षिणी ॥
सकौलिक गृहान्तस्था सवामा च सदक्षिणा । स पञ्चवाणव्यथिता सदादेव प्रसादिनी ॥
सघना च सुगन्धा च सतडित्कान्ति सन्निभा । सर्वकालमयी रूपा सबिम्बा शील लंघना ॥
सेन्द्रायुध समुत्कण्ठा सुराचार्यवरप्रदा । सुगन्धवल्ली कान्तस्था समुद्रा सान्द्रमालिका ॥
सत्यज्योति स्वरूपस्था सजुहोमित भाषिणी । शुनिसेफः ऋषिस्तुत्या श्वेतवर्णा समुज्वला ॥
श्रीकृष्णाङ्क निवासिनी शुभगा शुभमङ्गला । स्नानोदकप्रिया स्नाता समुद्रा सिन्धुवासिनी ॥
सच्छिष्यस्य बोधिनी शिष्या शतजन्मा शताकृतिः । सद्गनाश्रित पादाब्जा सदानन्दविहारिणी ॥
सर्वतीर्थाऽवगाहिनी संक्षोभन सच्चक्रका । श्रीं ह्लीं क्रीं भैरवीसाध्या श्रीं क्रीं ह्लीं ह्लूं समन्विता ॥
शब्दब्रह्म समुत्पन्ना शङ्करोत्पत्तिकारिणी । शत्रुनाशा शत्रुदाता शत्रुनाशनतत्परा ॥
श्रीं ह्लीं स्त्रीं शुक्लभैरवी शुं शुं शक्तिस्वरूपिणी । शालाक्षी शालरूपा च शालपानपरायणा ॥
शूं शूं शूं गतिस्वरूपिणी सकाराक्षरभूषिता । शीघ्ररूपा च शीघ्रा च शीघ्रतत्त्वविमोहिनी ॥
शूकरस्था शूकरेज्या शूकराकृतिलाल..ा । शत्रोरशनसन्तुष्टा शैलस्नेह प्रियङ्करी ॥
शमीपूजारतप्रीता शान्तिस्तोत्र परायणी । शववाहनसन्तुष्टा शवरूपा शवेश्वरी ॥
श्रीमद्रूपा च सद्बाला शेषचण्डपरायणा । श्रीगुणा श्रीशरन्माया शारदानन्दकारिणी ॥
श्रीपार्वति शक्तिमेधा श्रीकमला च सुगर्भिणी । शीतोष्मसम दुःखघ्नी शिवमुद्रा प्रदर्शिनी ॥
सुकाली सुतारा च सुछिन्ना च सुसुन्दरी । श्रीमद्भुवनेश्वरी च श्री श्रीमाया च सुसिद्धिदा ॥
श्रीबगला श्रीघूमा श्रीमहालक्ष्मी च शालिका । स्वकीयार्चनसन्तुष्टा शिवावलिप्रियात्मिका ॥
सुरम्या चित्रकूटस्था सुदर्शनसहायिनी । सभयाऽभीष्ट वरदा सक्रोधा सभयङ्करी ॥
सुग्रीवादि हरिस्तुत्या सुष्टुग्रीवा सुसागरा । सप्तपातालचरणा सप्तालप्रभेदिनी ॥
सुरक्तमणिभूषाङ्गी शुम्भासुरनिकृन्तिनी । शुद्धस्फटिकसंकाशा सुताम्बूलधरप्रिया ॥
सुसर्वज्ञा सर्वशवित सर्वैश्वर्यप्रदायिनी । सर्वश्रीशाङ्करी सर्वोन्मादिनी च महांकुशा ॥
सां सी सर्वाशपूरणी श्रैं श्रैं श्रैं श्रीचक्रस्वामिनी । शापानुग्रहसामर्थ्या स्वचक्रायुध रक्षिणी ॥
सगरात्मजसन्दग्धा शुक्रकर्त्री च सप्तमी । संवत्सरप्रिया षष्ठी सत्यगृहस्वरूपिणी ॥
सुसस्य सरितस्नाता सरितानांशिरोमणिः । सहजानन्दलहरी स्वर्णाकर्षणभैरवी ॥
सुभोजन प्रीतिचित्ता षड्रसस्वादनप्रिया । सौधात्मिका सौधरूपा सुसौधा सैन्धवप्रिया ॥
शोधना शोधकृत् सौधा शोधनप्रियमानसा । सुदृष्टिश्च सुलज्जा च सुभ्रुनासा समौक्तिका ॥

सुधाहृदयदर्पघ्नी सुर्यघ्नी सर्वकृन्तनी । सर्वप्रयोगकुशला सर्वस्तम्भनकारिणी ॥१७५॥
शुश्रूपालन सन्तुष्टा शुश्रूषेपा शुश्रुप्रिया । सुदामादुःखसंहर्त्री सुभद्राशोकनाशिनी ॥१७६॥
शरणप्रतिज्ञापहृता सहदेवप्रियङ्करी । शक्ति कल्याणदात्री च शक्तवैरी विनाशिनी ॥१७७॥
श्रीकृष्णबीजसहिता शशिविघ्नविनाशिनी । श्रीं क्लीं बिघ्नविनाशिन्यै शन्तुभोग परायणा ॥
सम्पूर्णचन्द्रवदना शोकमार्गविनाशिनी । शत्रूच्चाटनमार्गस्था शत्रुमोहनकारिणी ॥१७९॥
शुद्धीवादनसन्तुष्टा सारात्सारतरास्मृता । सारस्वतमुनिस्तुल्या साधिताऽखिल वैभवा ॥१८०॥
सुपुष्पिता सुवेलाद्रिसमीपा सर्वकामिनी । सर्वभूतान्तनिरता श्लोकतत्त्वार्थदर्शिनी ॥१८१॥
संजयप्रियकर्त्री च सुयोधनवधोद्यता । सर्वभूतपतिस्स्तुत्या सात्त्विकी सर्वरंजिणी ॥१८२॥
सामीप्यफलदायीं च सारूप्यफलभोगिनी । सालोक्यफलसिद्धयर्था सायुज्यपददायिनी ॥१८३॥

## अथफल श्रुतिः—

इति ते कथितं देवि ! दिव्यनामसहस्रकम् । सीतादेव्याः परं गुह्यं महापातकनाशनम् ॥१८४॥
अष्टम्यां च चतुर्दश्यां संक्रान्तौ मङ्गलेदिने । अमायां च तथा रात्रौ नवम्यां च शुभेदिने ॥१८५॥
पूजाकाले व्यतीपाते सन्ध्ययोरुभयोरपि । यः पठेद् पाठयेद् वापि शृणोति श्रावयेदपि ॥१८६॥
लभते गाणपत्यं सः यः पठेत् साधकोत्तमः । सर्वपापविनिर्मुक्तः सयाति परमांगतिम् ॥१८७॥
श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः पठेत् । दुर्गतिं तरते घोरां सयाति विष्णुमन्दिरम् ॥१८८॥
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना । स्तुत्वा स्तोत्रमिदं पुत्राँल्लभते चिरजीविनः ॥
यं यं चिन्तयते कामी पठेत्स्तोत्रमनुत्तमम् । सीता वरप्रसादेन तं तं प्राप्नोति मानवः ॥१९१॥
पञ्चोपचारैः नैवेद्यं बलिभिर्बहुशोभितैः । धूप दीपैर्महादेवीं पूजयित्वा मनोरमे ॥१९२॥
षडक्षरं महामन्त्रं यद्वा लक्षं पठेत्सुधी । अनन्यचेता स्थिरधीर्विशुद्धासन संस्थितः ॥१९३॥
वायुतुल्य बलो लोके दुर्जयः शत्रुमर्दनः । सर्वविद्यावतां श्रेष्ठो धनेन च धनाधिपः ॥१९४॥
सर्वसंकटमुत्तीर्णः सर्वसिद्धिसमन्वितः । श्रीसीतोत्कृष्टदेव्याश्च सेव्यमानोस्मरोपमः ॥१९५॥

हे देवि ! यह श्रीसीता देवी का गुप्त तथा महापातक नष्ट करने वाला सहस्रनाम स्तोत्र मैंने तुमसे कहा है, अष्टमी को-चतुर्दशी-संक्रान्ति-मङ्गलवार-अमावस को तथा नवमी के शुभ दिन में रात्रि में पवित्र होकर पाठ करे अथवा व्यतीपात के दिन तथा प्रातः साय संध्याकाल में जो पढ़ता है-पढ़ाता है-सुनता है-सुनाता है, वह श्रेष्ठ साधक सभी पापों से मुक्त होकर परमगति को प्राप्त करता है । श्रद्धा से अश्रद्धा से जो कोई मानव इसका पाठ करे तो

वह घोर दुर्गति से तरकर प्रभु के वैकुण्ठ में जाता है वन्ध्या ( जिसको कभी सन्तान न हुआ हो ) काक वन्ध्या ( जिसके एकबार सन्तान होकर फिर वन्ध्या हो गई हो ) मृतवत्सा ( जिसके सन्तान मर जाते हों ) ऐसी स्त्रियां इस स्तोत्र का पवित्र श्रीवैष्णव विप्र के मुख से श्रवण करके उसकी प्रसंसा करे अथवा स्वयं पाठ करे तो उसको चिरंजीवी पुत्र प्राप्त होता है। जिस जिस वस्तु की कामना से इस सर्वोत्तम स्तोत्र का पाठ किया जाय वह सब वस्तु मनुष्य श्री सीता जी की प्रसन्नता से प्राप्त करता है। पञ्चोपचार पूजन करके श्रीसीता देवी को बहुत सुन्दर खूब नैवेद्य भोग धरावे। धूप-दीप-पंकवान्न समर्पण श्रीफल बलि आदि मनोहर पदार्थों से महादेवी की पूजा कर उनके षडक्षर मूल मन्त्र का सुधी भक्त साधक एक लाख जप करे। अनन्य निष्ठा से एक आसन से विशुद्ध भावना से जो यह अनुष्ठान करे तो वह पवन के समान बलवान होता है, शत्रुओं का मर्दन करता है. उसको कोई जीत नहीं सकता है. विद्वानो में सर्वश्रेष्ठ बनता है. धनवानों में कुबेर तुल्य हो जाता है। श्रेष्ठ संकटों को पार कर सर्व सिद्धियों से सम्पन्न हो जाता है. सर्वोत्कृष्ट श्रीसीता देवी का उपासक सौन्दर्य में कामदेव के समान हो जाता हैं। ( श्लोक १८४ से १९५ )

**महेशवद्योगीन्द्रः भूतैःसह प्रपूजितः । कामतुल्यस्वरूपोऽसौ सर्वाकर्षणकारकः ॥**
**सूर्येन्दुजलवायूनां स्तम्भको राजवल्लभः । यशस्वी सत्कविर्धीमान् समन्त्री कोकिलस्वरः ॥**
**बहुपुत्रो जगत्स्वामी नरेशोधार्मिकः सुखी । मार्कण्डेय इवायुष्मान् जरापलितवर्जितः ॥**
**नवयौवनयुक्तः स्यादपिवर्षसहस्रभाक् । बहु किं कथनात्तस्य पठेत्स्तवमनुत्तमम् ॥**
**न किञ्चिद् दुर्लभंलोके यद्यद्मनसि वर्तते । तत्सर्वं स्वल्पकालेन भविष्यति वरानने ॥**
**सुरापानं ब्रह्महत्या स्तेयं गुर्वङ्गनागमः । सर्वमाशुतरत्येव स्तवस्यास्यप्रसादतः ॥**
**स्तवेनानेनसंस्तुत्वा साधकः किन्नसाधयेत् । मूलमष्टोत्तर जप्त्वा पठेन्नामसहस्रकम् ॥**

वह महेश्वर के समान भूतेश्वरों से पूजित योगीन्द्र पद प्राप्त करता है, काम के समान स्वरूपवान् होकर सभी का आकर्षण कर सकता है. सूर्य-जल तथा पवन के अनिष्ट प्रभाव को रोक सकता है. वह यशस्वी-सत्कवि-बुद्धिमान-मन्त्रज्ञ-विचारक-निर्णायक-नरेश-धार्मिक-सुखी प्रजा का स्वामी-तथा पुत्र-पौत्रवान् होता है. वृद्धावस्था तथा रोग रहित स्वस्थ रहता है. मार्कण्डेय के समान दीर्घायु होता है. हजारों वर्ष नव यौवन सम्पन्न रह सकता है. बहुत क्या कहें जो इस सर्वोत्तम स्तोत्र का पाठ करता है उसको संसार में कुछ भी दुर्लभ नहीं है। हे सुन्दर श्रेष्ठ मुख वाली पार्वती ! वह जो मन में इच्छा करता है वह शीघ्र ही अनायास प्राप्त करता है। ब्रह्महत्या-सुरापान-गुरुपत्नी गमन जैसे महापापों से वह इस स्तोत्र पाठ की कृपा से शीघ्र मुक्त हो जाता है। इस स्तोत्र के साधन से साधक क्या सिद्धि प्राप्त नहीं करता है। मूल मन्त्र का अष्टोत्तरशत १०८ जप करके तब इस स्तोत्र का पाठ करना चाहिये। (श्लोक १९६ से २०२)

दर्शनं च भवेदाशु देवगन्धर्वसेवितः । येन केन प्रकारेण सीताभक्तिः समन्वितः ॥२०३॥
स्तम्भयेदखिलान् कामान् राजानमपिमोहयेत् । परनिन्दा परद्रोह परवाद परायणः ॥२०४॥
खलाय परतन्त्राय भ्रष्टाय च दुरात्मने । न देयं भक्तिहीनाय शिवद्रोहकराय च ॥२०५॥
रामभक्ति विहीनाय परदाररताय च । जपपूजाविहीनाय द्विज श्री निन्दकाय च ॥२०६॥
न स्तवंदर्शयेद्दिव्यं दर्शनाच्छिवहाभवेत् । कुलीनाय सुशीलाय रामभक्ति पराय च ॥२०७॥
वैष्णवाय विशुद्धाय भक्तेर्नक्ताय मन्त्रिणे । देयं सहस्रनामेदमश्वमेधफलं लभेत् ॥२०८॥
देव्यैर्निवेदितं यत्–तत् तस्यांशं भक्षयेन्नरः । दिव्यदेहधरोभूत्वा देव्याः पार्श्वचरोभवेत् ॥२०९॥
नैवेद्यनिन्दकं दृष्ट्वा नृत्यन्तियोगिनीगणाः । रक्तपानोद्यतासर्वा मांसास्थिचर्मणोद्यताः ॥२१०॥
तस्यै निवेदितं देव्यै दृष्ट्वा स्तुत्वा च मानवम् । न निन्देन्मनसावाचा सर्वव्याधिपराङ्मुखः ॥
यस्यालयेतिष्ठतिनूनमेतत् स्तोत्रं सुरम्यं लिखितं विधिज्ञैः ।
गोरोचनालङ्कृत कुंकुमाक्तं कर्पूर सिन्दूर मदद्रवेन ॥२१२॥
न तत्र चौरस्य भयं न शत्रुतो न वाशने वह्नि न व्याधिभीतिः ।
उत्पातवातैरपि नात्रशङ्का लक्ष्मी स्वयं तत्र वसेदलोला ॥२१३॥

इति श्रीरुद्रयामले उमामहेश्वरसंवादे सकरादि श्रीसीतासहस्रनामस्तोत्रम्

॥ सम्पूर्णम् ॥

चाहे जिस प्रकार से श्रीसीता भक्ति सम्पन्न भक्तजन इस स्तोत्र का पाठ करेगा वह शीघ्र ही श्री जानकी जी का दर्शन प्राप्त कर देव-गन्धर्व पूजित हो जाता है । सभी कामनाओं को स्तम्भित कर सकता है, राजाओं को मोहित करता है । दूसरों को व्यर्थ कलंक लगाने वाले परनिन्दक-परद्रोही-परस्त्रीगामी शिव द्रोही-श्रीराम प्रेम रहित-पूजा पाठ भजन भाव से रहित-नित्य नियम मन्त्रानुष्ठान विमुख-साधु ब्राह्मण तथा स्त्री निन्दक को यह स्तोत्र नहीं दिखाना चाहिये । ऐसे लोगों को यह दिखलाने वाला शिवजी की हत्या का भागी अथवा अपने कल्याण कार्य का घातक होता है । जो कुलीन सत्कुलप्रसूत हो, सुशील हो, श्रीराम भक्ति परायण हो, वैष्णव हो, विशुद्ध सदाचारी हो, मन्त्रानुष्ठान परायण हो, ऐसे सुपात्र को यह "श्रीसीता सहस्रनाम" स्तोत्र प्रदान करेगा उसको अश्वमेध यज्ञ करने का फल मिलेगा । श्री सीता जी को भोग लगाया प्रसाद जो खाता है वह दिव्य देहधारी बनकर श्री जू की नित्य सेवा प्राप्त सहचर बनकर कृतार्थ हो जाता है । जो श्रीजानकीजी के नैवेद्य की निन्दा करता है उसका रक्त पान करने के लिये योगिनी गण नाचने लगते हैं । उसका मांस चमड़ा खींच लेना चाहते हैं । अतः श्री सीता जी को अर्पण किये गये प्रसाद को देखकर उसकी प्रसंसा स्तुति ही करनी चाहिये, निन्दा तो भूल कर भी मन वचन से कभी नहीं करनी चाहिये । इस नियम को

पालन करने वाला सर्व व्याधि से मुक्त होकर सदा सुखी रहता है। जिसके घर में सुन्दर रम्य अक्षरों में लिखा हुआ यह स्तोत्र रहता है तथा विधि जानने वाला भक्तजन केशर-कस्तूरी चन्दन-कपूर तथा सिन्दूर चढ़ाकर नित्य पूजन करता रहता है, उसके घर में कभी चोर का भय नहीं होता है, न कोई शत्रु का भय रहता है, बिजली ( वज्रपात ) अग्नि काण्ड आदि उपद्रवों का भय नहीं रहता है। उसका घर सर्वोपद्रव से रहित शंका भय मुक्त स्वयं श्रीब[illegible] जी का अविचल निवास स्थान बन जाता है। ( श्लोक २०३ से २१३ )

“यह श्रीरुद्रयामल तन्त्र का उमा महेश्वर संवादात्मक सकारादि “श्रीसीता सहस्रनाम स्तोत्र” सम्पूर्ण हुआ।